## महाराष्ट्र राज्य माध्यमिक तथा उच्च माध्यमिक शिक्षणमंडख, पुणे.

## संस्कृतम्। ( संयुक्त- अभ्यासक्रमः)

दशमी कक्षा **प्रतिदर्श- कृतिपत्रिका** गुणा :४०

अवधिः- होराद्वयम्।

---

प्रथमः विभागः गद्यम्।

**प्रश्नः१अ)गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**१) अवबोधनम्।**(केऽपि २ कृती कुरुत।)

**I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** १

द्वितीयं ------- दृष्ट्वा ------ पृष्टम्।(उद्विग्नमनसं/ शान्तचेतसं)( नागार्जुनेन/महाराजेन)

**II)कः कं वदति?** १

येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम्?

**III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।** १

मार्गस्थरुग्णस्य समीपे स्थित्वा प्रथमः युवकः तस्य सेवां कृतवान्।

*एकदा राजानं गत्वा नागार्जुनः प्रार्थयामास,'महाराज, कार्यबाहुल्याद् मत्कृते सहायकस्य आवश्यकता वर्तते।'एतच्छ्रुत्वा द्वितीये दिने एव तं प्रति महाराजः द्वौ युवानौ प्रेषितवान्। तौ परीक्षितुं नागार्जुनः उभावपि एकैकं वस्तु दत्त्वा अवदत्,'इदं गृहीत्वा स्वगृहं गच्छतम्। श्वः तस्मात् किमपि रसायनम् औषधं वा निर्माय आनयतामिति।*

*अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ। तदा तयोरेकः उक्तवान्, 'महाशय, अहं रसायनं कृत्वा आनीतवान्। पश्यतु भवानिति।' द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं,'कथमिदानीम् अभाषमाणः तिष्ठसि? किं त्वया नानीतं रसायनम्?'' तदाकर्ण्य स मन्दस्वरेण अगदत्, 'आचार्य,ह्यः गच्छन् पथि आवामेकं रुग्णमपश्याव। तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान्। तस्य समीपे स्थित्वा तस्य सेवां कृतवान्। अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति।' तस्य सेवाभावं ज्ञात्वा नागार्जुनस्तमेव द्वितीयं युवकं सहायकत्वेन स्वीकृतवान्। येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम्?इति राज्ञा पृष्टे सति नागार्जुनोऽभणत्, एतेन रोगिणः सेवा कृता, मानवता दर्शिता। सेवाभावेन विना कथं चिकित्सको भवेत्? अतः अस्यैव नियुक्तिः मया कृता।'*

**अ२)स्वमतप्रकटनम्। ( माध्यमभाषया)** २

नागार्जुनस्य निर्णयविषये ३०/४० शब्दपरिमितां भवत्प्रतिक्रियां लिखत।

**प्रश्नः१ब) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**ब१) अवबोधनम्।(केऽपि २ कृती कुरुत।)**

I) **उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** १

कबड्डी इति भारतीया----- क्रीडा ------ विशेषरुपेण लोकप्रियतां गता।

(साङ्घिक / वैयक्तिक) (उत्तरभारते,महाराष्ट्रराज्ये)

II) **पूर्णवाक्येन उत्तरं लिखत।** १

तुकाराममहाराजस्य अभङ्गवचनेषु कबड्डीक्रीडा कैः नामाभिः निर्दिष्टा अस्ति?

III) वाक्यं **पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत।** १

वङ्गदेशे 'चेडुगुडु' दक्षिणभारते ' हुडू' उत्तरभारते कबड्डी इति नाम्ना विख्यातैषा क्रीडा।

प्राचीनकालतो विविधाः क्रीडाः प्रचलिताः। काश्चित् साङ्घिकाः काश्चिच्च वैयक्तिकाः। साङ्घिक-क्रीडासु कबड्डी इति भारतीया क्रीडा महाराष्ट्रराज्ये विशेषरुपेण लोकप्रियतां गता। 'हुतुतू'इति तस्याः अपरं नाम। तुकाराममहाराजस्य अभङ्गवचनेषु एषा क्रीडा 'हमामा, हुंबरी, हुतुतू' इत्यादिभिः नामभिः निर्दिष्टा। वङ्गदेशे 'हुडू' दक्षिणभारते 'चेडुगुडु' उत्तरभारते कबड्डी इति नाम्ना विख्यातैषा क्रीडा।

अस्यां क्रीडायां प्रतिसङ्घं द्वादश क्रीडापटवः भवन्ति। क्रीडाङ्गणे तु सप्त क्रीडापटव एव खेलन्ति।पञ्च क्रीडापटवो बहिस्तिष्ठन्ति। एष क्रीडाप्रकारो न केवलं पुरुषाणाम् अपि तु महिलानां कृतेऽपि प्रचलितोऽस्ति।

अनया कबड्डी क्रीडया शरीरचापल्यम् उत्साहः आक्रमकत्वं स्वसंरक्षणवृत्तिः शरीरसौष्ठवं च लभते। साहसं निरीक्षणशक्तिः योजकत्वं निर्णयक्षमता साङ्घिकी भावना एकात्मता देशाभिमानश्चैतैः नैकैर्गुणैः क्रीडकस्य व्यक्तित्वं विकसति।एतस्यै क्रीडायै कस्यापि क्रीडासाधनस्यावश्यकता नास्तीति महत्त्वपूर्णं वैशिष्ट्यम्।

**ब२ पृथक्करणम्।** २



**प्रश्नः१क) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**क१) पृथक्करणम्।** २

यथाक्रमं घटनाः लिखत।

१)पिपीलिकानां साहाय्यम्। २) सूर्यखगस्य दिशादर्शनम्।

३) गुप्तचराणाम् आगमनम्। ४)अर्जुनस्य कृतज्ञताप्रकटनम्।

दीर्घसमयोऽतीतः। अज्ञातकालवासे शस्त्रहीनः परिव्राजकवेषधारी अर्जुनः पुनरेकवारं तमेव वनप्रदेशं प्राविशत्। निबिडारण्ये पर्यटति तस्मिन् कुतश्चित् मनुजशब्द इव श्रुतिपथमागतः। कांश्चन गुप्तचरान् तं प्रति एवागच्छतः स दृष्टवान्। सः व्यचिन्तयत्,'अज्ञातवासकाले यदि कोऽपि मामभिजानीयात् तर्हि महापत्तिः उद्भवेत्। किं करणीयमधुना। इति चिन्तयतः तस्य पुरतः सूर्यखगः तत्रोपस्थितः। तेन स्वरवेण मार्गं निर्दिश्यार्जुनः कस्यापि विशालवृक्षस्य समीपं नीतः। वृक्षे महान् कोटरः आसीत्। कोटरं प्रविश्य अर्जुनः तत्रैव निभृतं स्थितः। तस्मिन् कोटरे स्थिते पिपीलिकाभिस्तस्य सर्वाङ्गं तथा आच्छादितं यथा अदृश्यः इवाभवत्। अर्जुनमन्विष्यन्तःतत्रागताः ते गुप्तचराः तं ज्ञातुमसमर्थाः ततः प्रतिनिवृत्ताः।

एवं सङ्कटमुक्तोऽर्जुनः सूर्यखगस्य पिपीलिकानां च वचनं स्मारं स्मारं तान् प्रति कृतज्ञतां प्रकटितवान्।

**क२)शब्दज्ञानम्।**

**चतुर्थं पदं लिखत।** पुरतः-पृष्ठतः, कृतज्ञता - --------। १/२

**समूहेतरं पदं लिखत।** आपत्तिः, विपत्तिः, सम्पत्तिः, १/२

**विशेषण-विशेष्य-अन्वितिः।**

गद्यांशे आगते अर्जुनस्य द्वे विशेषणे स्तः ------- , -------- । १

**धातुसाधित-अव्ययानां चयनम्।**

गद्यांशे आगते द्वे धातुसाधित ल्यबन्त-अव्यये लिखत। ------- , ------- । १

**द्वितीयः विभागः पद्यम्।**

प्रश्नः२) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। २

**अ१)पृथक्करणम्।**



एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च।
दन्तशोधनचूर्णेन दन्तमांसन्यबाधयन्।।१।।
अत्यम्बुपानान्न विपच्यतेऽन्नं निरम्बुपानाच्चस एव दोषः।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि।।२।।
भोजनान्ते पिबेत्तक्रं वासरान्ते पिबेत् पयः।निशान्ते च पिबेद्वारि त्रिभी रोगो न जायते।।३।।

**अ२)शब्दज्ञानम्।**

I)दिनान्ते शब्दस्य कृते श्लोके आगतः पर्यायशब्दः अस्ति --------। १
II)अल्पम् शब्दस्य कृते श्लोके आगतः पर्यायशब्दः अस्ति --------।

**ब) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**
**ब१) तात्पर्यलेखनम्**

प्रथम/ द्वितीय सुभाषितस्य तात्पर्यं माध्यमभाषया लिखत। २

साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन।। १।।

शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम्।
रसायनमिव प्राज्ञैर्हेलया न कदाचन।।२।।

शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहताश्च नितरां सुहता भवन्ति।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकम्
प्रज्ञा कुलं च विभवं च यशश्च हन्ति।।३।।

**ब२) अवबोधनम्।**
**पूर्णवाक्येन उत्तरं लिखत।** १
प्रज्ञया पुरुषस्य किं किं हन्यते?

**क) स्मरणम्।**

**क१)श्लोकांशान् मेलयत।** २

| | |
|---|---|
| नयविक्रमसंयोगस्तत्र | न मूषकः। |
| गजश्च सिंहस्य बलं | न वायसः। |
| पात्रापात्रविवेको हि | श्रीरचला ध्रुवम्। |
| पिको वसन्तस्य गुणं | यत्रालस्यविहीनता। |
| | धेनुपन्नगयोरिव। |

**क२)श्लोकपूर्तिः।**

**सुभाषितं शुद्धं पूर्णं च लिखत।** २
केवलं १
अद्रोहः----- प्रशस्यते।।
उपानहौ च ------च।।

**तृतीयः विभागः व्याकरणम्।**

**प्रश्नः३)यथानिर्देशं कृतीः कुरुत।** ( ५ उपप्रश्नाः लेखनीयाः ।)

**अ)नाम/सर्वनामपदानां पृथक्करणम्। (कोष्टकपूरणम् )**( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः)**२**

| | चतुर्थी एकवचन Dative singular | सप्तमी एकवचन Locitive Singular | द्वितीया बहुवचन Accusative plural |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(भगवते , अस्याम्, सर्वस्मै, वाचि , पक्षिणः,एतानि)

**ब) क्रियापदानां पृथक्करणम्। ( कोष्टकपूरणम् )** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

| द्वितीयभविष्यत्कालः II Future Tense | **परोक्षभूतकाल: Perfect Past** | **प्रथमभूतकालः Imperfect Past** | **विध्यर्थः Potentia** | **आज्ञार्थः Imperative** | **वर्तमानकाल: Present Tense** |
|---|---|---|---|---|---|
| | | | | | |

(जगाम, दद्याम् ,करिष्यामः,अशक्नवम्,जानानि , तन्वे)

**क)समासाः** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

विग्रहवाक्यानां समासनामभिः सह मेलनम्।

| | |
|---|---|
| I)धेनुः च पन्नगःच। | उपपद तत्पुरुषः। |
| II)न विद्यते असूया यस्य सः। | कर्मधारयः। |
| III)कालं जानाति इति। | षष्ठी तत्पुरुषः। |
| IV)चन्द्रस्य ज्योत्स्ना। | अव्ययीभावः। |
| V)अधिकं मूल्यम्। | नञ् बहुव्रीहिः। |
| VI)स्थानम् अनतिक्रम्य। | इतरेतर द्वन्द्वः। |
| | द्विगुः। |

---

**ड) उपपदविभक्तिः** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

I)-------- विना पापान्मुक्तिरशक्या। (प्रायश्वित्तं/ प्रायश्चित्तस्य)

II)वृक्षः ----- फलानि यच्छति। (जनान्/ जनेभ्यः)

III)परमेश्वरः भक्तान् ------ रक्षति। (विघ्नात्/विघ्नेन)

IV)---- उभयतः क्षेत्राणि सन्ति। (नद्याः/ नदीम्)

V)यात्री ----- गतवान्। (सागरतीरं/सागरतीरः)

VI)------- नमः।(विद्यादेव्यै/ विद्यादेवीं)

---

**इ) सन्धिं/ सन्धिविग्रहं कुरुत।** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

रिक्तस्थानपूर्तिः।

i)तटभ्रमैश्च= -----+ च।

ii) युष्माभिरिह = युष्माभिः + ----।

iii)----- = मुहुः+ मुहुः।

iv) ------- = कः + अर्थः।

v)अस्मिन् + एव= -----।

vi) चिदानन्दः = ---- + आनन्दः।

**फ) सङ्ख्यावाचकविशेषणानि।** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

रिक्तस्थानपूर्तिः।

i)कर्मणः---- फले पापं तथा पुण्यम्।(द्वौ/द्वे)

ii)मम जन्मदिवसे मातामही ----- पक्वान्नानि करोति। (5)

iii)श्रीकृष्णः देवक्याः ----- अपत्यम्। (8th)

iv)शाकुन्तलस्य ----- अङ्कः अतीव सुन्दरः।(चत्वारः/चतुर्थः)

v)वर्षे ------षण्मासिकं प्रकाशितं भवति।

vi)देवः मानवः दानवः च प्रजापतेः ----- पुत्राः। (3)

**चतुर्थ विभागः – लेखनकौशलम् ।**

**प्रश्न४)अधोनिर्दिष्टे कृती कुरुत।**

**अ)वाक्यनिर्माणम्**

तालिकातः शब्दान् चित्वा **अर्थसङ्गतानि** ४ वाक्यानि लिखत। ४

| | | |
|---|---|---|
| प्रयोगशीलः कृषकः | किमपि | चिन्तयति। |
| अध्ययनशीलः छात्रः | अधिकं | कार्यं करोति। |
| कार्यतत्परा सेविका | सततं | पृच्छति। |
| आश्चर्यचकितःबालः | सत्वरं | निरीक्षते। |

**ब)कथा /परिच्छेदपूर्तिः**

मञ्जूषातःउचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा कथां पुनर्लिखत। ४

महाराष्ट्रराज्ये रायगडः नाम सुविख्यातः दुर्गः। एकदा हिरकणी दुग्धविक्रयार्थं रायदुर्गं ----- उत्सुका। किन्तु तस्याः शिशुः अद्यापि न सुप्तः।यदा दोलरूढः शिशुःसुप्तः तदा हिरकणी ---- प्रस्थिता। दुर्गे दुग्धविक्रयार्थम् अधिकः कालक्षेपः अभवत्।सूर्ये अस्तमिते दुर्गद्वाराणि पिहितानि। आवृत्तं महाद्वारं ---- सा द्वारोद्घाटनाय रक्षापुरुषं प्रार्थयत। परं सूर्योदयसमये एव द्वारम् उद्घाटनीयम् इति ------ आज्ञाम् अनुसृत्य सः तद् न उद्घाटितवान्। अस्वस्थचित्ता सा इतस्ततःअभ्रमत्।तस्याः नयनयोः पुरतः केवलं तस्याः शिशुः आसीत्।पुत्रस्नेहेन स एकस्मात् तटात् अवतरणं प्रारभत।सुदूरम् उपप्लुत्य भूमौ न्यपतत्। गृहम् अगच्छत् च।शिवभूपेन तस्याः न केवलं प्रशंसा कृता तस्यै पारितोषिकमपि दत्तम्।

(गन्तुम्. शिवभूपस्य,विलोक्य, दुर्गम्)